International Journal of Multidisciplinary Education and Research
ISSN: 2455-4588; Impact Factor: RJIF 5.12
www.educationjournal.in
Volume 2; Issue 2; March 2017; Page No. 65-66

# उज्ज्वलदत्तेन उद्धृताः कोशगतसन्दर्भाः

**डॉ. दोलामणिः आर्यः**
सहायक–प्राध्यापक, लक्ष्मीबाई महाविद्यालय, दिल्ली विश्वविद्यालय, दिल्ली, भारत।

## प्रस्तावना

**उज्ज्वलदत्तोणादिवृत्तेर्वैशिष्ट्यम्** – इयं खल्वुणादिसूत्राणां वृत्तिरुदाहरणं, उदाहरणानां साहित्यिककोशगतसन्दर्भाः, बाहुल्येन शब्दसाधुत्वप्रदर्शनप्रकारो वृत्तिन्यासानुन्यासादीनां समीक्षापूर्वकं रुचिकरं सारगर्भितं च व्याख्यानं प्रस्तौति। अस्याः कतिपयवैशिष्ट्यानि सन्ति –

1. अत्र साक्षात् प्राचीनोणादिवृत्तिकाराणां वृत्तेरुल्लेखो वर्तते। यथा– देववृत्तिः (उणा० 3.98, 101, 117, 140; 5.61), गोवर्धनवृत्तिः (उणा० 4.69), सूतीवृत्तिः (उणा० 3.140), नग्नवृत्तिः (उणा० 4. 66), प्राचीनवृत्तिः (उणा० 2.32)।
2. केचिदादिपदेनानुपलब्धानां वृत्तीनां वृत्तिकारणाञ्चात्र सङ्केतो विद्यते। यथा – अन्ये (उणा० 1.121, 2.28, 3.38), अपरे (उणा० 1.115), एके (उणा० 1.150), एकीयमतेन (उदा० 2.57), केचित् (उणा० 1.115; 144; 2.107; 4.2; 5.21), काचिद्वृत्तिः (उणा० 1. 128–130; 3.16)।
3. अनेकेषां वैयाकरणानां मतसमीक्षणमत्र बहुत्र दरीदृश्यते। यथा – 'तपसस्तापस इति देववृत्तौ प्रमादः' (उणा० 3.117), सूत्रमिदं न्यासकारस्यासम्मतम् (उणा० 1.26), ञकारान्तः सौत्रो धातुरूह्यत इति... सूत्रे रक्षितः (उणा० 1.106), वातप्रमीति सुलोपोऽपि भवतीति दुर्घटे रक्षितः (उणा० 4.1) इत्यादयः।
4. अत्र बहुविधानां दुर्लभानां कोशानां कोशकाराणाञ्च निदर्शनं प्राप्यते। यथा– रत्नमतिः (उणा० 1.51), रत्नकोशः (उणा० 2. 40), गोपालितः (उणा० 3.22; 4.1, 29), वोपालिनः (उणा० 4.55, 78), अचलकोशः (उणा० 3.68)। अमरकोशादीनाञ्च सर्वत्रोद्धरणानि सुलभानि।
5. अत्र भूरिशः साहित्यग्रन्थाः साहित्यकाराश्च स्मर्यन्ते। दिङ्मात्रं यथा – राजशेखरः (उणा० 3.76), वृन्दावनयमकम् (उणा० 1.28, 78, 121), सूर्यशतकम् (उणा० 2.15, 96), भट्टिः (उणा० 1.108), भारविः (उणा० 1.95), माघः (उणा० 1.3), कुमारसम्भवम् (उणा० 2.39) इत्यादयोऽनेकेऽत्र स्मृताः।

**उज्ज्वलेन स्मृता कोशाः तेषां सन्दर्भाश्च –**

तालिका 1

| कोशाः | उद्धरणानि च |
|---|---|
| अचलकोशः | स्तवके गुत्सगुत्स कावित्यचलकोशः (उणा० 3.68) |
| अजयकोशः | अजयकोशे काञ्चन्यामपि इन्त्यवान् (उणा० 2.75); वदान्यस्त्याणिवाग्मिनोः इत्यजयकोशः (उणा० 3.104); जादिम् इति चवर्गतृतीयादावजयकोशः (उणा० 4.43); रजोऽयं रजसा सार्धं स्त्रीपुष्पगुणधूलिषु इत्यजयकोशः (उणा० 4.216); कीनाशः कृषके यम इत्यजयकोशः (उणा० 5.56) |
| अमरकोशः | मायुः पित्तं कफः श्लेष्मेत्यमरः (उणा० 1.1); आयुर्जीवितकालो ना स्यादिति क्षत्रियवर्गेऽमर (उणा० 1.2); प्रस्थः सानुरस्त्रियामिति क्वचित; जानूपर्वाष्ठीवदस्त्रियामित्यमरः (उणा० 1.3); गर्भाशयो जरायुः स्यादित्यमरः (उणा० 1.4); तालु काकुदत्मित्यमरः (उणा० 1.5); मरु पर्वतधन्वनो रेफान्तेऽमरः (उणा० 1.7); पुंसि लवलोशकणाणव इत्यमरकोशः (उणा० 1.8); व्रीहिभेदस्त्वणुः पुमानित्यमरः (उणा० 1. 10); हनुर्हट्टविलासिनीत्यमरः (उणा० 1.11); सिन्धुर्नाब्धौ नदे देशे सिन्धुस्तु सरिति स्त्रियामित्यमरः (उणा० 1.12); इषुर्द्वयोरित्यमरः (उणा० 1.14); रज्जुः स्त्रियामित्यमरः (उणा० 1.16); पांशुर्ना न द्वयो रज इत्यमरः (उणा० 1.28); चिकुरश्चलकेशयोरित्यमरः (उणा० 1. 42); पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरश्च तयोः पितेत्यमरः (उणा० 1.45); लुलापो महिष इत्यमरः (उणा० 1.46); निवेशः शिविरं शण्ढ इत्यमरः (उणा० 1.54); चाण्डालिका तु कण्डोलवीणा चाण्डालवल्लकीत्यमरः (उणा० 1.67); सूत्राणि नरि तन्तव इत्यमरः (उणा० 1. 70); जैवातकः शशाङ्कः स्यादायुष्मानपि कीर्त्तित इत्यमरः (उणा० 1.81); स्त्रियां मूर्त्तिस्तनुस्तनूरित्यमरः (उणा० 1.82); वधूर्जायास्नुषास्त्रीष्विति धातेऽमरः (उणा० 1.85); तुम्ब्यलाबूरुभे समे इत्यमरः (उणा० 1.89); कशेरुजतुवस्तूनि हित्वा तुरुविरामका इत्यमरः (उणा० 1.90); दद्रुणो दद्रुरोगी स्यादित्यमरः (उणा० 1.92); अन्दुको हस्तिनिगड इत्यमरः (उणा० 1.95); कुशलं क्षेममस्त्रियामित्यमरः (उणा० 1.108); दण्डोऽस्त्री लगुडेऽपि चेत्यमरः (उणा० 1.113); गुडो गोलेक्षुपाकयोरित्यमरः (उणा० 1.114); पलालोऽस्त्री स निष्फल इत्यमरः (उणा० 1.117); पूगः क्रमुकवृन्दयोरित्यमरः (उणा० 1.123); पद्मं नलिनमित्यमरः (उणा० 1.139); ओङ्कारप्रणवौ समावित्यमरः (उणा० 1.141); श्यामो हरितकृष्णयोरित्यमरः (उणा० 1.144); विश्वं स्त्रीक्लीवयोः शुष्ठ्यामित्यमरः (उणा० 1.151); ग्रैवेयकं कण्ठभूषेत्यमरः (उणा० 1.154); राजा क्षत्रिय चन्द्रयोरित्यमरः (उणा० 1.156)। हरेणुखण्डिकौ चास्मिन्निति वैश्यवर्गेऽमरः (उणा० 2.1); पृष्ठं तु चरमं तनोरित्यमरः (उणा० 2.12); नाडी तु धमनिः सिरेत्यमरः (उणा० 2.13); वीध्रं तु विमलार्थकमिति विशेष्यनिघ्नेऽमरः (उणा० 2.26); पुन्नपुंसकयोर्वप्र इत्यमरः (उणा० 2.27); सङ्कसुकोऽस्थिर इत्यमरः (उणा० 2.29); गिरिका बालमूषिकेत्यमरः (उणा० 2.42); केशे तु वृजिनो मत इत्यमरः (उणा० 2.47); अजिनं चर्म कृत्तिः स्त्रीत्यमरः (उणा० 2.48); शरिणं शून्यमूषरमित्यमरः (उणा० 2.51); पुलिनं तोयसन्निधाविति नान्तेऽमरः (उणा० 2.53); जुहू स्त्रियां स्रूग्भेद इत्यमरः (उणा० 2.60); वाणिजो वाणिगित्यमरः (उणा० 2.70); नान्दीवादी नान्दीकरः समावित्यमरः (उणा० 2.74); विष्टपं भुवनं जगदित्यमरः (उणा० 2.80); पृषन्ति विन्दुपृषता इत्यमरः (उणा० 2.84); शिश्विदानः पापकर्मेति विशेष्यनिहनेऽमरः (उणा० 2.93); भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्पर मित्यमरः (उणा० 2.98); नारी सीमन्तिनी वधूः (उणा० 2.101); स्त्रियां नौस्तरणिस्तरिरित्यमरः (उणा० 2.103); वर्तन्येकपदीति चेत्यमरः (उणा० 2.107); ज्वालाभासोर्नपुंस्यर्चिरित्यमरः (उणा० 2.109); धनुरस्त्रियामित्यमरः (उणा० 2.118)। पर्णः स्यात् किंशुके पत्र |

| | |
|---|---|
| | इत्यमरः (उणा० 3.6); सूना च गलशुण्डिकेति नान्तेऽमरः (उणा० 3.13); शर्पमस्त्री प्रस्फोटने मानविशेषेऽपीत्यमरः (उणा० 3.26)। |

इत्यादीनि अमरकोशस्य बहुविधान्युद्धरणानि स्ववृत्तौ उज्ज्वलदत्तेन उपन्यस्तानि।

**तालिका 2**

| अमरकोशटीका | मृगनाभिर्मृगमदः कस्तूरी चेति मृगनाभिशब्दस्य पुंस्त्वमित्यमरकोशटीकायाम् (उणा० 4.125); |
|---|---|
| अमरटीका | पुरुरसुरविशेषोऽपीत्यमरटीकायाम् (उणा० 1.24); वृषं धर्मं लुनातीति वृषल इति काचिदमरटीका (उणा० 1.18); शोथः श्वयथुरित्यमरटीकायाम् (उणा० 2.4); श्रोणः पङ्गरित्यमरटीका (उणा० 3.6)। |
| अमरमाला | स्त्रीपुंसयोर्षितस्तिः स्यादित्यमरमाला (उणा० 4.181); स्वर्भानुस्तु तमो राहुः सैंहिकेयो विधुन्तुद इत्यमरमालायी पुंस्काण्डे (उणा० 4.188); श्मश्रुः पुंमुखरोमणीत्यमरमाला (उणा० 5.28)। |
| आचार्यकोशः | आवसथे वक्रकवितानमित्याचार्य कोशः (उणा० 3.114)। |
| उत्पलिनीकोशः | चाटुः पिचिण्डे च नु तौ चाटुरालाये तत्सममित्युत्पलिनीकोशः (उणा० 1.3); गण्डुर्गूण्डूश्च दृश्यत इत्युत्पलिनीकोशः (उदा० 1.7); शृङ्गं विषाणमाख्यातं शैलाग्रे जलयन्त्रके मीनौषधिसुवर्णानां भेदे शृङ्गी प्रयुज्यत इत्युत्पलिनी (उदा० 1.125); इक्षुर्मधु तृणं स्मृतमित्युत्पलिनी (उणा० 5.157); माः शब्दो मासि चन्द्रे च सम्मतो बहुदृश्वनामित्युत्पलिनी कोशः (उणा० 4.188)। |
| कोशः | यः सम्प्रति प्राक् परिषद्वलानामिति कोशः (उणा० 1.129); प्रावृषा तु जलाप्लव इति कोशः (उणा० 2.57); स्त्रियां त्वक् स्यात्त्वचं चोचमिति कोशः (उणा० 2.63); बर्हिर्ना कुशशुष्मणोरिति कोशः (उणा० 2.110); धीवरी मत्स्यघातिनीति कोशः (उणा० 3.1); वातिङ्गणस्तु वार्त्ताकुरिति कोशः (उणा० 3.79)। |
| कोशान्तरम् | विशालोज्जयिनी प्रोक्ता पुरी चान्या च मानिनीति कोशान्तरम् (उणा० 1.117); पतङ्गः शलभे सूर्ये पतङ्गः पक्षिणि स्मृतः इति कोशान्तरम् (उणा० 1.118); खड्गो गण्डकशृङ्गसियुद्धभेदेषु गण्डके। गान्त इति कोशान्तरम् (उणा० 1.123); शिवं मोक्षे सुखे भ्रदे सलिलेऽथ शिवो हर इति कोशान्तरम् (उणा० 1.153); कन्दर्पो दर्पकः कामः शिखो मृत्युजरान्वित इति कोशान्तरम् (उणा० 3.21); वाष्पो नेत्रजलोष्मणोरिति कोशान्तरम् (उणा० 3.28); चालनं तितउन्युवतमिति कोशान्तरम् (उणा० 5.52)। |
| त्रिकाण्डशेषः | वासुर्नारायणपुनर्वसुविश्वरूपा इति त्रिकाण्डशेषे (उणा० 1.1)। |
| द्विरूपकोषः | मसूरो मसुरो मत इति द्विरूपकोषः (उणा० 1.44); आमिषं भक्ष्यमांसयोरिति द्विरूपकोषः (उणा० 1.47); नरको नारकोऽपि चेति द्विरूपकोशः (उणा० 5.35)। |
| धरणिकोशः | कारूः शिल्पिनि कारके (उणा० 1.1); गुच्छः स्यात् स्तवके स्तम्बे हारभेदे च दृश्यत इति चवर्गादिप्रकरणे धरणिकोशः (उणा० 3.68)। |
| नानार्थमरमाला | शाको मात्रादौ द्वीप इति तालव्यादौ नानार्थामरमाला (उणा० 3.43)। |
| नाममाला | क्षत्ता स्यात्सारथौ द्वाः स्थे वैश्यायामपि शूद्रज इति नाममाला (उणा० 2.94)। |
| रत्नकोषः | स्त्री कृकुशी कृषिकः फाल इति रत्नकोषः (उदा० 2.40)। |
| रत्नमाला कोशः | चाटुर्नरि प्रियोक्तिः स्यादिदिति रत्नमालाकोशः (उणा० 1.3)। |
| रन्तिदेवकोशः | बन्धूबन्धुरौ स्यातां नम्रसुन्दरयोस्त्रिष्विति रन्तिदेव कोशः (उणा० 1.42)। |
| रभसकोशः | कर्षूः पुंसि करीषाग्नौ कर्षूर्नद्यां स्त्रियां मतेति रभसकोशः (उणा० 1.82); |
| रुद्रकोशः | जगत्स्याद्विष्टपे क्लीवं वायौना जङ्गमे त्रिष्विति रुद्रकोशः (उणा० 2.84); ज्योतिर्ना भास्करेऽग्नौ च क्लीवं भद्योतदृष्टिष्विति रुद्रकोशः (उणा० 2.111); गोमी निन्द्यप्रशस्तयोरिति रुद्रकोशः (उणा० 4.158) |
| वररुचिकोशः | हनुः पुमान् पुसे गण्डादिति वररुचिकोशः (उणा० 1.11)। |
| वाचस्पतिकोशः | तनुर्धनुरूरू चञ्चुः प्रियङ्गुः सरयुः कुडुरिति वाचस्पतिकोशः (उणा० 3.22)। |
| विक्रमादित्यकोशः | मरुतः स्पर्शनः प्राणः समीरो मारुतो मरुत् (उणा० 1.96); शिङ्घाणः फेनडिण्डीरौ नक्ररेतश्च पिच्छिल इति विक्रमादित्यकोशः (उणा० 3. 83); अर्हन्तः क्षपणको जिन इति विक्रमादित्यकोशः (उणा० 3.126); पिचण्डी दूषिका दूषी पिचीण्डं तु दृशोर्मलमिति विक्रमादित्यकोशः (उणा० 4.16); स्मृतश्चाषः किकीदिवीरिति विक्रमादित्यकोशः (उणा० 4.56); नहुषः खुररोमा च शेषवासुकितक्षका इति विक्रमादित्यकोशे (उणा० 4.75); कोशः कृतः सकलसत्खानिरत्नवानिति विक्रमादित्यकोशः (उणा० 4.139)। |
| विश्वः | सानुः शृङ्गे बुधे मार्गे वात्यायां पल्लवे वन इति विश्वः (उणा० 1.3); मधु मद्यं मधु क्षौद्रं मधु पुष्परसं विदुरिति विश्वः (उणा० 1.19); भृगुः शुक्रे प्रपाते च जमदग्नौ पिनाकिनि गान्त इति विश्वः (उणा० 1.29); पीलुर्गजे द्रुमे काण्डे परमाणुप्रसूनयोः लान्ते इति विश्वः (उणा० 1. 38); दर्दुरा चण्डिकायान्तु ग्रामजाले च दर्दुरम्। रान्त इति विश्वः (उणा० 1.41); शिविरं स्यादृतोर्भेदे तुषारे शीतलेऽन्यवत्। रान्त इति विश्वः (उणा० 1.54); नदी भेदे च गोदी स्याद्वरुणस्य च योषिति विश्वः (1.66); धातुः स्यादश्मविकृतौ विषयेष्विन्द्रियेऽपि च० (उणा० 1. 70)। इत्यादीनि। |
| शब्दार्णवः | जटायुः स्याद्विहगेन्द्रो जटायुररुणाग्रज इति शब्दार्णवः (उणा० 1.2); पृथवी पृथिवी पृथ्वी धरा सर्वं सहा रसेति शब्दार्णवः (उणा० 1.150); हिरण्यं द्रविणं द्युम्नं रिक्थमृक्थं धनं वस्विति शब्दार्णवः (उणा० 2.7); हिमांशुश्चन्द्रमाश्चन्द्रः शशी चन्द्रो हिमद्युतिरिति शब्दार्णवः (उणा० 2. 13); ननान्दा च स्वसा पत्युर्ननन्दा नन्दिनी च सा (उणा० 2.99); वटुर्द्विजसुतः स्मृत इति संसाशवर्वः (उणा० 1.9); रौहिषो मृगभेदः स्याद्रौहिषं च तृणं मतमिति संसारावर्तः (उणा० 1.48); |
| हारावली | लट्वा स्यात्तुलिका शिलीति हारावली (उणा० 1.151); कृसरः स्यात्तिलौदनम् इति हारावली (उणा० 3.73); उल्मुकं ज्वलदङ्गारम् इति हारावली (उणा० 3.84); चमसः पिष्टवर्तिः स्यात् इति हारावली (उणा० 3.117)। भ्रमरः कामुकेऽपि स्यात् इति हारावली (उणा० 3.132); दाडिमेऽपि च हिण्डीरम् इति हारावली (उणा० 4.30); सप्तरात्रप्रसूतायाः क्षीरं पेयूषमुच्यत इति हारावली (उणा० 4.78) |